This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥श्री गणेशाय नमः॥ श्रीवरदमूर्तये नमः॥ श्रीदक्षिणामूर्तिगुरुभ्यो नमः॥ प्राविश्यं चित नौति पालयन्ति मासं हि॥
पक्षे ब्रह्माणं च हरिं हरं च मनसे वो सादयन्ती गुणैः॥ सावित्रीं च रमामुमां च तनुजां दत्वाथ तेभ्यः पृथक् जुष्टा
प्रत्यपि दृष्टं तच्च सकलं तां नौमि विश्वेश्वरीं॥ अथ मात्स्ये पुराण लक्षणं॥ पंचांगानि पुराणस्य आख्यानमेति
तत्स्मृतं॥ पुराणांतरेपि तथा॥ कोन्येपि तथा॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च॥ वंशानुचरितं चैव
पुराणं पंचलक्षणं॥ अष्टादशपुराणानि पंचलक्षणलक्षितानि वैष्णवाभिमत भागवतं तु पंचलक्षणल
क्षितमतः पुराणांतर्गतं न भवति॥ देवीभागवतं तु॥ शौनक उवाच॥ अष्टादशपुराणानि कृष्णेन मुनिना सह॥ कथिता
नि सूत ऐतानि परिकीर्तितानि त्वया किल। पंचलक्षणयुक्तानि सरहस्यानि मानद॥ त्वया श्रुतानि सर्वाणि व्यासात् सत्य
वतीसुतात॥ पुराणमुत्तमं पुण्यं श्रीमद्भागवताभिधं॥ इत्यनेन भागवतस्यापि भागवतं पुराणांतर्गतं॥ तथा मात्स्ये॥
अष्टादशपुराणानि कृत्वा सत्यवतीसुतः॥ भारताख्यानमखिलं चक्रे तदुपबृंहितं॥ एकैकं वैष्णवाभिमत भागवते भा
रतोत्तरं निर्णीतो व्यासः शुकं [illegible] इति दर्शनात् वैष्णवाभिमत भागवतं अष्टादशपुराणांतर्गतं न॥ तथा श्रीदेवी
भागवते॥ सूत उवाच॥ शृण्वंतु संप्रवक्ष्यामि पुराणानि मुनीश्वराः॥ तथा श्रुतानि तत्वेन व्यासात् सत्यवतीसुतात्॥
मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयं॥ अनापलिंगकूर्मस्कंदपुराणानि पृथक् पृथक्॥ चतुर्दशसहस्रं च मात्स्यमाद्यं प्रकी
र्तितं॥ तथा च हस्रसहस्रं तु मार्कंडेयं महाद्भुतं॥ चतुर्दशसहस्राणि तथा पंचशतानि च॥ भविष्यं परिसंख्यातं मुनिभि=
स्तत्त्वदर्शिभिः॥ अष्टादशसहस्रं वै पुण्यं भागवतं किल॥ तथा चायुतसंख्यातं पुराणं ब्रह्मसंज्ञकं॥ द्वादशैव सहस्रा
णि ब्रह्मांडं च पुरातनं॥ तथाष्टादशसाहस्रं ब्रह्मवैवर्तमुच्यते॥ अयुतं वामनाख्यं च वायव्यं षट्शतानि ~~किंचिदि~~॥

Checked 2012

KKSU LIBRARY RAMTEK 441 106 M-1442 Dist Nagpur

Acc. No. - ~~309~~ M1442
Title - दुर्जनमुख चपेटिका संपूर्ण
Author - काशीनाथ
Date - ?
Sub. - Devotional poetry
Folio - 3
Xerox - 6

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नि च ॥ त्रयोविंशति साहस्रं वैष्णवं परमाद्भुतं ॥ चतुर्विंशति साहस्रं वाराहं परमाद्भुतं ॥ षोडशैव सहस्राणि पुराणमग्निसं
ज्ञितं ॥ पंचविंशति साहस्रं नारदं परमाद्भुतं ॥ मं मतं ॥ पंचपंचाशत्साहस्रं पद्माख्यं मुनि विपुलं मतं ॥ एकादशसहस्राणि
लिंगाख्यं चातिविस्तरं ॥ एकोनविंशत्साहस्रं गरुडं हरिभाषितं ॥ सप्तदशैव साहस्रं पुराणं कूर्मभाषितं ॥ एकाशीतिसहस्रा
णि स्कंदाख्यं परमाद्भुतं ॥ पुराणसंख्या चाख्याता विस्तरेण मयानघ ॥ तथैवोपपुराणानि शृण्वंतु ऋषिसत्तमाः ॥ सनत्कु
मारं प्रथमं नारसिंहं ततः परं ॥ नारदीयं शिवं चैव दुर्वाससमनुत्तमं ॥ कापिलं मानवं चैव तथा औशनसं स्मृतं ॥ वारुणं कालि
काख्यं च सांबं नंदीकृतं शुभं ॥ सौरं पाराशरं प्रोक्तमादित्यं चातिविस्तरं ॥ माहेश्वरं भागवतं वासिष्ठं च सविस्तरं ॥ एतान्यु
पपुराणानि कथितानि महात्मभिरिति ॥ देवीभागवते इदं पंचमं भागवतामिदं पुराणं इत्सगते नपुराणांतर्गतं ॥ भारते
शांतिपर्वणि भीष्मेण युधिष्ठिरं प्रति धर्मोपदेशप्रस्तावे मुक्तिरुक्तेति कुत एव परीक्षित्पर्यंतं शुकानुवृत्तिरिति वि
रोधाहे स्मवाभिमत भागवतपुराणांतर्गतं न देवीभागवते शुकपरीक्षित्संवादे एव नास्ति भारतेपि परीक्षितिनाशूण पं
श्रुत्वा एतस्य भविरचितेप्रासादे समंतास्तु से रक्षितेवा पुण्यवेशहीने स्थित्वा तत्रैव राजकार्यं कृत्वा सप्तदिवसे प्रा
प्ते तक्षकेन दष्टः सन् निर्वाणं प्रापित इत्युक्ते न शुकप्रोक्तं अदर्शनात् देवीभागवते पुराणं ॥ विष्णुपुराणे ॥ बौ[illegible] ख्या
वतारे तो मायामोहो देवो हरिः ॥ पद्मपुराणेपि तथापि तु । स्क । वैष्णवाभिमतभागवते पंचमस्कंधे तु इक्ष्वाकुवंशस्य
जिनस्येव बौ ख्य लोके साधुनिर्हेतुकिः श्रीधरेण संदिग्धं अन्य भागवतं मिति नारोरुनीचेमित्येनैव स्वाभिमतभा
गवते आरंभ एवंतेभ्रंतः पुराणांतर्गतं न ॥ मात्स्ये ॥ यत्राधिकृत्य गायत्रीमिति ॥ गायत्र्या गायत्री छंदः गायत्री छं
देन गायत्रीत्वं अर्थस्य ब्रह्मसंनिपादकत्वं ॥ धीमहि ॥ प्रचोदयात् ॥ पदद्वयेन घटना ॥ यत्र यत्र गायत्री तत्र तत्र पदद्वयं ॥
वैष्णव मतु भागवते तु धीमहीति पदघटितत्वात् इदं भागवतं भिस्कंते ॥ एतत्पदमात्रेण कथं ज्ञायते अतः वैष्णवाभिम
भागव तं तेपुराणांतर्गतं न भविष्यति ॥ देवीभागवते छंदस्त्वात् अर्थत्वात् पदद्वयघटितत्वात् पुराणं
४ वर्ण्यते धर्मविस्तरः ॥ वृत्रासुरवधोपेतं तद्भागवतं ॥ इष्यते ॥ यत्र

संहिता ॥ जुष्टं

तेश्रुमा ॥ वृत्रवधस्तु भागवतद्वयेपि वर्त्तते ॥ मात्स्ये ॥ सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः ॥ तद्वृत्तांतोद्भवं
लोके ॥ भागवतमुच्यते ॥ वैष्णवाभिमतभागवते सारस्वतकल्प ल्पाद्युद्देशनात् पुराणांतर्गतिं न देवीभागवते
सारस्वतकल्प अतः पुराणांतर्गते ॥ पुराणांतरे ॥ ग्रंथोऽष्टादशसाहस्रो द्वादशस्कंधसंहिता ॥ हयग्रीवब्रह्मवि
द्या यत्र वृत्रवधस्तथा ॥ गायत्र्याच समारंभस्तद्वै भागवतं विदुः ॥ स्कंधा द्वादश एवात्र कृष्णेन विहिताः शुभाः ॥ द्वा
त्रिंशत्रिशतं पूर्णमध्यायाः परिकीर्तिताः ॥ वैष्णवाभिमतभागवते ॥ द्वादशस्कंधाः वर्तंते ॥ अध्यायास्तु पंच
त्रिंशत्त्रिशतं त्रीण्यधिकानि अष्टादशसहस्रग्रंथो नास्ति तथा च हयग्रीवब्रह्मविद्या नास्ति ॥ अतः वैष्णवाभि
मतभागवते पुराणांतर्गतत्वं नभवति ॥ देवीभागवते तु ॥ अष्टादशसहस्राणि श्लोकाः द्वादशस्कंधाः द्वात्रिंशत्
त्रिशताध्यायाः वृत्रवधः गायत्र्या समारंभः सर्वं मीलितं हयग्रीवस्य उत्पत्तिकथा प्रथमस्कंधे वर्तते ॥ हयग्रीव
ब्रह्मविद्यापि ॥ पद्मपुराणे ॥ अंबरीषशुकप्रोक्तं नित्यं भागवतं श्रृणु ॥ पठस्व स्वमुखेनापि यदीच्छसि भवक्षय
मि संबरीषं प्रतिगौतमवचनं ॥ अंबरीषशुकप्रोक्तमिति ॥ शुकाय प्रोक्तं पाठितं ॥ वैष्णवाभिमतभागवते शुक
परीक्षित्संवादः कथितत्वात् ॥ अतः पुराणांतर्गतं न ॥ देवीभागवते श्रीमद्भागवतं वर्ण्यं सर्वदुःखोपनाशनं ॥ व्या
सेनैतच्छुभं पुराणं स्वकाय पुत्राय महात्मने प्रदत्तं ॥ वैराग्यमूलाय प्रपाठितं वै द्विसप्तवर्षाणि समुद्भवाय ॥ ता॥
अन्येषाम्बरीषं शुकप्रोक्तमिति देवीभागवतपुराणांतर्गतं ॥ मात्स्ये ॥ लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वि पा
तं ॥ प्रोष्ठपद्यां पौर्णमास्यां स याति परमां गतिं ॥ वैष्णवाभिमतभागवते विष्णुप्रीतिप्रदं हेमसिंहस्त देया
हनं भाद्रपौर्णिमा द्युयाति तत्र भागवत व्याः भागवतस्य दानविधिः अतो वैष्णवभागवतं पुराणांतर्गतं न
भवति ॥ अतः प्रमाणं ॥ वाराहपुराणे हेमगरुडसंयुतं ॥ मात्स्ये हेम मत्स्यसंयुतं ॥ कूर्मे हेमकूर्मसंयुतं ॥ स्कंदपुरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णांकितवस्य अतः हेमकूटकस समन्वितं ॥ विष्णुपुराणं घृतधेनुसमन्वितं ॥ पाद्मं स्वर्णकमलसंयुतं ॥ गरुडं हेमहंससम
न्वितं ॥ मार्कंडेयं हेमगजसंयुतं ॥ एवं वर्तते तथा भगवत्साः भागवतं हेमसिंहसमन्वितं अर्घदानविधिः भगवत्साः भाग
वतस्य अतः पुराणांतर्गतं श्रीदेवीभागवतं ॥ अन्यच्च ॥ अष्टादशपुराणकारिणी वेदसंमितभारत तकारिणी वाणी
भिन्ना वैष्णवभागवतस्य कार्यरूपा वाणी भिन्ना अतः वैष्णवभागवतं पुराणांतर्गतं न ॥ अष्टादशपुराणकारिणी
मा वाणी सैव देवीभागवतस्य वाणी अतः पुराणांतर्गतं देवीभागवतं ॥ वैष्णवभागवते अतिविस्तरेण कृष्णचरित्रघटितेस
ति न स्यात् कथासु स्वल्पादेर्लक्षणघटकत्वं कुतः पुराणे लिखितं अतः पुराणांतर्गतं न ॥ किंच अष्टादशपुराणाना
कर्ता सत्यवतीसुतः ॥ इति वचनादपि देवीभागवतस्य अष्टादशपुराणांतर्गतत्वं निश्चीयते । अवैदिकास्तु श्रीमद्देवीभाग
वतं द्विषंति ॥ पांचरात्रं भागवतं तंत्रं वैखानसाभिधं । वेदभ्रष्टान् समुद्दिश्य कमलापतिरुक्तवानित्यादिना पांचरात्रा
दितंत्रमार्गस्य श्रीमत्सांबपुराणे निंदितत्वात् ॥ किंच ॥ पांचरात्रादितंत्रमार्गगाः परां शक्तिमपि निंदंति ॥ द्वैतवादिनोपि श्री
मद्देवीभागवतं द्विषंति तेजारजारति ॥ तथा वायवीयसंहितायां उपमन्युः ॥ शक्तिपूजां विनिंदंति पुण्यलेशविवर्जिताः ॥
वैष्णवलाभिमानेन ये भिंदंति शिवार्चनं ॥ तेषां मुखं स्तिसां कर्म मनुमेयं विपश्चिता ॥ वैदिकावैदिकाचारविभागज्ञाने
वर्जिताः ॥ अश्रौताचारसंपन्ना श्रौताचारपराङ्मुखाः । विदूषितभमारुदेवी महादेवकुटुंबिनी ॥ आकारणादि
जगदुत्पत्त्यादिकां मम मातरं ॥ तत्पूजां च विनिंदंतो निर्भयाः पुरुषाधमाः ॥ पापिष्ठा वैदिकाभासा दृश्यंते बहवः क
लौ ॥ समयाचारविद्वान् तदाचारविवर्जिताः ॥ स्वस्वगोत्रस्य गोपयंतः श्रीजननासादिहीनवदिति ॥ ब्रह्मांडपुराणे ।
तस्माद्भक्तो ललिताकामारिपुरराधनं विना ॥ न स्तो भोगापवर्गौ तु योगपद्येन कुत्रचित् ॥ जन्मनास्तत्कृतप्राण
स्तद्यानीतकृतेहकः ॥ तदाक्येमैनकर्माणि कुर्वन्मुक्तिमवाप्स्यति ॥ देवीभागवते पंचमस्कंधे ॥ वर्तते सर्व ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शक्तिः सर्वात्मना रूप ।। यावत्पश्यन्ति हीनस [illegible] मासवता ।। चिच्छक्तिः सर्वभूतेषु [illegible] रूपं तस्यास्त देवता हीति ।। ब्रह्माण्डपु
राणे ।। वर्णाश्रम विहीनानां पिपिलानां नृणामपि ।। यद्रूपध्यानमात्रेण उत्कृतं स्फुकृता यत रति । देवीभागवते ।। सहस्रन
यनारामा सहस्रकरसंयुता ।। सहस्रशीर्षचरणा भाति दूरादसन्नायं ।। ब्रह्मा विष्णुस्तथा रुद्रो भुवसिवौ वरुणो यमः ।। वायुर
ग्निकुबेरश्च त्वष्टा पूषाश्विनौ भगः ।। आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ।। सर्वे ध्यायन्ति तां देवीं सृष्टिस्थित्यंत
कारिणीमिति ।। वायुपुराणे अरण्ये प्रांतरे वापि जले वापि स्थलेपि वा ।। व्याघ्रकुंभीरचोरेभ्यो भयस्थाने विशेषतः ।। आ
धिष्वपि च सर्वेषु देव्या नामानि कीर्तयेदिति वचनेन देवीनाम सामान्यस्य यस्य यस्यकस्यापि कीर्तनेन भयान्निवृत्तिरुक्ता ।। प
झपुराणेपि । स्वपन्तिष्ठन्व्रजन्मार्गे प्रलपन्भोजनेरतः ।। कीर्तयेत्सततं देवीं स वै मुच्येत बंधनादिति देवीनामकीर्तन
सामान्यस्यैव बंधनिवर्तकत्वमुक्तं । देवीभागवते ।। ब्रह्मैव सापि दुःप्राप्ता विद्याविद्यास्वरूपिणी ।। [illegible] ।। [illegible] विद्याविद्ये
ति देव्या द्वे रूपे जानीहि पार्थिव । एकया मुच्यते जंतुरन्यया बध्यते पुनरिति ।। सो हं [illegible] स्वरूपं नाद्वितीया ।। आत्मा
नात्मविवेकाभावो विद्या ।। शक्तिरहस्ये । आत्मबुद्ध्या प्रतीकेन मातृबुद्ध्याथवा प्रिया । कर्मणापि मनोजन्मे सः कैवल्य
पदमश्नुते । अथ देवीभागवते । द्वितीयस्कंधे ।। येनेदं श्रुतं भागवतं पुराणं नाराधिता ये ः प्रकृतिपुराणी । प्राप्तेन तत्वगु
[illegible] तापैस्ते बाध्यमाना मनुजा नराणां ।। [illegible] श्रीभागवतं पुण्यं सुमतेन संकथ्यते ।। पंचलक्षणसंयुक्तं विद्याविलसिता
न्वितं ।। तत्रैव प्रथमस्कंधे । न देहो न च जीवात्मा नेंद्रियाणि परंतप ।। मन एव मनुष्याणां कारणं बंधमोक्षयोः ।। शुद्धो मुक्त
सदैवात्मा न वै बध्येत कर्हिचित् ।। बंधमोक्षौ मनःसंगौ तस्मिन्शांते प्रशाम्यति ।। शत्रुर्मित्रमुदासीनभेदाः सर्वे मनोग
ताः ।। एकात्मत्वे कथं भेदः संभवेत् द्वैतदर्शनात् ।। जीवो ब्रह्म सदा नैव नात्र कार्या विचारणा ।। भेदबुद्धिस्तु संसारे
वर्तमाने प्रवर्तते ।। अविद्येयं महाभाग विद्या चैतन्निवर्तनं ।। विद्याविद्ये च विज्ञेये सर्वदैव विचक्षणैः ।। विना तपेन
[illegible] आमतेच रूपसुखं । अविद्याध्यापिनातद्रूपं विद्याचैवेति वै इत्यादि ।। श्रीदेवीभागवते ।। हयग्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उवाच ॥ नमो देविमालष्मणोस्पिष्टिसिद्ध्ये संतकारिणि ॥ भक्तानुग्रहच कुरे कामदेमोक्षदे शिवे । धरापतेजः पवनख पंचानां च महार
ण ॥ नंगंधर्व रस्वरूपाणां मारगं स्पर्शना कुर्ध्याः ॥ प्राणं च रसनां च चक्षुस्त्वकं श्रोत्रमिंद्रियाणि च । कर्मेंद्रियाणि वाग्यादि
क्ततः सर्वमिह त्वं करोषि ॥ तत्रैव । जलं वायुर्नभो धरानं चांबरं गुणानं तेषां च वेंद्रियाण्यहं । मनोनबुद्धिर्ने च तिगम्यगुणः स्थिता तदा
सिदेविल महेनमाभिः ॥ ततो मस्कंधे ॥ यां वदाः जवदंसनादिभिपनां समाम्यगुनजानंति ते देवा विष्णुविरंचिरुद्रसंहिता ताव्या
यति चिंतसदा ॥ यदीयैः ससमन्विते त्वदुदिनं युजंति मायाजका स्तां विद्यां सकलार्थदा मकलितां वंदे भवानीमहं ॥ प्रादिगुणां
हरिहरादि दिरपभ्यावित्रासतां प्रियतमाथसमाधिगम्यां ॥ सा तस्य चित्तकुहरे प्रकरोति भावं यः सम्मणोति सततं
कुसती पुराणमिति ॥ तत्रैव निर्गुणा यास दानि सा व्यापका विकृता शिवा । योगगम्याखिलाधारा तुरीया याच संस्थि
ता ॥ तस्या नु सात्विकी शक्ति राजसी तामसी तथा ॥ महालक्ष्मी सरस्वती महाकाली ति तास्त्रयः ॥ तासां तिसृणां
कीनां देहांगीकारलक्षणः ॥ स्मृष्ट्यर्थं च समाख्या तः सर्गः शास्त्रविशारदैः ॥ हरि द्रुहिण रुद्राणां समुत्पत्तिस्ततस्म
नात्समादि ॥ स्कंदे च ॥ तां न त्वा मनसा देवीं सर्वकारणकारणं ॥ जननीं सर्वदेवानां ब्रह्मादीनां तथेश्वरीमिति ॥
तथा रुद्रसूत्रे च ॥ स्वतंत्रा विश्वसिद्धिहेतुरिति ॥ ब्रह्मांडे ॥ स्वतंत्राहं सदा देवी स्वेच्छाचारविहारिणी इति ॥ भावनो
पनिषदि ॥ सर्वकारणं कर्ता शक्तिः ॥ श्री देवीभागवते ॥ आराध्या परमा शक्तिः सर्वैरपि सुरासुरैः ॥ नातः परतरं
किंचिदधिकं भुवनत्रये ॥ सुसंसत्यं पुनः सत्यं वेदशास्त्रार्थनिर्णयं ॥ पूजनीया परा शक्ति र्निर्गुणा सगुणाथवा ॥
इत्यलमतिविस्तारेण ॥ इति श्रीमद्गौडपनामकजयराम भट्टसास्तुत वाराणसी गर्भसंभव काशीनाथ भट्ट
विरचिता दुर्जनमुखचपेटिका समाप्ता ॥ श्री ललितार्पणमस्तु ॥ शुभं भूयात् ॥ हर्दपुस्तकं पाठकोपनाम
कृष्णराम चंद्रेण लिखितं । श्री साबसदाशिवार्पणमस्तु ॥ ॥ ॥ ॥ ॥ ॥ ॥

K K S U LIBRARY
RAMTEK
441 106
M-1442
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=19.10.20 16:47
,TRANSFERRED=2020/10/19 at 16:48:23
,PAGES=6
,TYPE=STD
,NAME=S0004193
,Book Name=M-1442-DURJAN MUKH CHAPETIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection